कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

~~१५~~
१०अ

॥छ॥ ॥अथपूर्वचनुस्समाप्तिप्रारंभः॥ ॥छ॥

Title → चौरपञ्चाशिका (पूर्ण)
Author → बिल्हण
Date → ?
Subject → Poetry.
folioes → 17
Xerox Pages → 34
Acc No. → ~~780~~ M1397.

KKSU LIBRARY
RAMTEK
441 106
M-1397
Dist Nagpur

Checked 2012

पूर्वच०ति
॥१॥

श्रीगणेशायनमः॥ध्यात्वागणेशमखिलागमसारभूतंश्रीशारदांसुरनमस्कृतपादपद्मान्॥किं
चित्स्वकीयमतिसंस्फुरितेननव्यंकाव्यंकरोमिविदुषांसुखबोधनार्थं॥१॥स्वर्गोवनीविमल
मंडलखंडतुल्येभूमंडलेमहिलपत्तननामधेये॥वीरांगगुर्जरजनैःपरिसेव्यमानोभोगीवभू
वनृपतिःकिलवीरसिंहः॥२॥सच्चारएवनिजधर्मरताःसदैववर्णाश्चयस्यनगरेरजनीकर
स्य॥चंचद्गवाक्षपथिवीक्षणादस्यवक्त्रेबिंबोदयंप्रकटयंतिदिनेपिनार्यः॥३॥योवैरिवीरवरवार
णादर्पसिंहोविद्याविनोदविविधाभिरसःकृतलोवान्॥गांभीर्यधैर्यगुरुदानगुणैःसल्लोकेपांति
स्मवीरनृपतिर्निजराजधर्मैः॥४॥इत्थंनृपेलारजनीकरबिंबवक्त्राराज्ञोप्यव[illegible]तिनृपतेर
तुलस्यपुत्री॥पाणिग्रहेणविधिनाविहितासुताराप्रख्याबभूवसकलासुवरांगनासु॥५॥कालके
मेलाविमलाकमलासमानाचंद्राननानयननिर्जितपद्मपत्री॥चंद्रोदयेथनृपतेःकिलपट्टराज्ञी
जज्ञेसुतांशशिकलामितिरसनाम्नी॥६॥सावर्द्धतेशशिकलाशशिनःकलेवराज्ञोविशिष्टतन
याह्यधिकंभाग्या॥अल्पैर्दिनैःकतिपयैरपिराजधानीमागत्यवाक्यसुधयाजनकंतुतोष॥७॥

कृ२

॥राम
॥१॥

अवदातः शीतोगौरस्समरः ॥७॥

तां वीक्ष्य चारुवदनां चतुराननस्य वाचामिव प्रचुरसंचुरबुद्धिशीलां ॥ बालामबालगुणरूपवतीं नरेशश्चिं
तां चकार तनयाध्ययनाय नित्यं ॥८॥ राजीवपत्रनयना नरराजकन्या यल्लिलया पिकवने मधुरं बभाषे ॥
तद्वीरसिंहनृपतेरमृतोपमानं चित्ते बभूव सुखदायि दिवानिशायां ॥९॥ इत्थं नवीरनृपवीरपरेशश्चि
न्ते नित्यं चकोरकविराजपदाति कन्या ॥ तां तस्स्वहीयगुणगौरवगाढचित्तं चिंतां चकार सुतरां गुणि
ने ददर्श ॥१०॥ श्रीराजहंसनमितेन पुरोहितेन राज्ञो निवेद्य विदिताखिलनकेपन ॥ कश्मीरकः
ल६ कविरयं गुणिनां दिदृक्षुस्त्वामागतः क्षितिपबि[illegible]णनामधेयः ॥११॥ मुक्तेंदुकुंदकुसुमस्फटिका
वदाता सर्वामरेंद्रभुजगेंद्रनरेंद्रसेव्या ॥ मंत्रार्थतंत्रजननी श्रुतिनां श्रीशारदासि विषये तत आगतो
यं ॥१२॥ कृत्वा मतिं विषयपूर्वमथाशिषं वा जग्राह वीरनृपतिः कविराजतोपि ॥ मायाप्रपंचजगदा
र्णवभीतभीतः सिद्धोपदेशमिव धर्मपरश्च लोकः ॥१३॥ दृष्ट्वा समस्तकुशलं कुलदेवतायां आदि
ष्टवान्निजपुरोहितमस्य तुष्ट्यै ॥ यद्दोच तेन स कवये पुरतः प्रभूतं भोज्यांबरादि विततार यथोपदिष्टं
॥१४॥ तस्मै विहस्य कवयेंद्रविणं कधीशः प्रीत्या सुताध्ययनकारणकोविदाय ॥ दत्वा निकाममुदि

पृ० च० ति
॥२॥

तास्य मनोरथश्रीः श्रीविरसिंहनृपतिर्मुदमाससाद ॥१५॥ स्नानानुलेपनमनोरमभोजनानि दिव्यांबराणि
बहुमानपुरःसराणि ॥ काश्मीरकः कविवरोथ निशम्य रात्रौ प्रातः पुरोहितयुतो नृपतिं ददर्श ॥१६॥ सद्यः
प्रबंधविधिनां गुरुतामविलंब्य द्रव्यप्रपंचरचनापटुना कवींद्रः ॥ विद्यावगा[illegible]हनैवासपयोनिधिस्तांधीरस्तु नि३
ताषसपथा न तथान्य एव ॥१७॥ एवं बिल[illegible]ललितार्थपदं कवींद्रमामंत्र्य तत्र तनयां कवये निवेद्य ॥ उद्या
पयप्रमुदितो भगवन्निमां त्वं कृत्वा प्रसादमथ चंद्रकलामुवाच ॥१८॥ उन्निद्रबुद्धिकुसुमः कविशेखरोयं
काश्मीरकः शशिकले कुरु पादपूजां ॥ क्रीडां विहाय शुकसारिगतां सखीनां शास्त्रं गृहाण वचनेन कविबिल्ह
णस्य ॥१९॥ राज्ञा विमृश्य गुणिनो गुरुभावभक्तिं व्यक्ता स्मरक्रमवतीमपि राजपुत्री ॥ दृष्टाप्यपाठ्यदितिप्रि
यतः कवींद्रः स्तोकैर्दिनैः शशिकलाविदुषी बभूव ॥२०॥ सा प्राकृतानि विमलानि च संस्कृतानि शास्त्रा
ण्यधीस किल चंद्रकला सुशीला ॥ श्रीबिल्हणं निजगुरुं प्रतिपद्य साक्षात् तं हर्षयां नृपतिमीषसरस्व
तीच ॥२१॥ तस्यागृहे प्रवरकुंकुमपुष्पवासे कर्पूरगौरसुरसागुरुचंदनाढ्ये ॥ शृंगारसारगहने किल
कामशास्त्रमध्यापयस पल चंद्रकलां कदाचित् ॥२२॥ विज्ञातमन्मथकलास्मरबाणविद्धा तस्यान्यजन्म
रमणी नरनाथपुत्री ॥ भावार्थभावितमनोभवतुल्यकांता कांते रसान्विदधतिस्म दृशोर्विकारान् ॥२३॥

राम
॥२॥

प्रेमादरान्तरलितेन विलोचनेन नवक्रोलचारुहसितेन सुधाधरेण ॥ ईषद्विजृंभितकुचद्वितयेन बालावि
द्धां समाशु वशिनं च वशी चकार ॥ २४ ॥ श्रीपद्मपत्रनयनां बरपद्महस्तां पद्मप्रकृष्टचरणांशुचिपद्मगं
धां ॥ तां पद्मिनीमिव सुपद्मनिकेतनां च पेनेकविः शशिकलामपि कामव[illegible]लीम् ॥ २५ ॥ सा प्राह तं कवि
द्व ४ मवेह्यमनोनुरागं स्वामि[illegible]यं भवति सर्वजनानुशंसे ॥ तत्त्वं शिवस्य शिवदापि च कामतत्त्वे संप्रतिस्म
रगुरुः स्मरशास्त्रमत्र ॥ २६ ॥ इत्युक्तरा एव विजने स विचार्य सर्वं गंधर्वराजविधिना जगृहेथ पाणिं ॥ का
मीपुवास्मरकलांकुशलाच बाला दैवानयोरघटितं घटितं बभूव ॥ २७ ॥ सा कामशास्त्रविधिनाखिलका
मवैल्लीलीलाविलाससनिलयं चक्रमे कवीशं ॥ अन्योन्यनूतनसुयौवनमोहितं च वाक्यैः सुधारसमयैः स
रंजबालां ॥ २८ ॥ राजप्रियोपि विविधागमपारगोपि मुत्ते सगूढचरितो नरराजपुत्रीं ॥ शास्त्रा
नु दितान्यदितानि च मोहनानि पश्यन्नहर्निशमती व विगूढचेताः ॥ २९ ॥ प्राह प्रियां स कविरेव मम प्रियेति
प४ सा तं कविं कथयति स्म मम प्रियस्त्वं ॥ पृच्छाम्यहं यदि पुनः कथयोत्तरं मे त्वं चापि मे कथय नाथ कवीशमुख्य ॥
३० ॥ अंगणं तदिदमुन्मदद्वी[illegible]स्मेरालिशालितविहारिणोहरे ॥ उल्लसत्तरुणपल्लवकेवलोसल्ल
वी सृजति किमतंगजः ॥ ३१ ॥ निरर्थकं जन्मगतं नलिन्यायपानदृष्टं तुहिनांशुबिंबम् ॥ उत्पत्तिरिंदोरपि
निष्फलेव दृष्टा यह दृष्टा न नलिनी नयन ॥ ३२ ॥ पूर्णेंदुबिंबसदृशं च नपासृजास्यमानम्य विद्रुमलताभि

पूर्वचंति ॥३॥

य

वचुंबना॥ कामप्रियं व्रतनिवेष्टनया पिधानमालिंगनं सपुलकं प्रथमं चकार॥३३॥ नीवीविबंधनविधान
विमोचनाय नाभिप्रदेशनिहितः कविनाप्रकोष्टः॥ कंदर्पमंदिरनिर्चाहरः करोस्य रुद्धः सतनस्फुरइवक्षि न२
तिपालपुत्र्या॥३४॥ आलिंग्य गाढमबलामुपनीपशय्यामारोप्य वक्षसि रदेन निपिड्य चोष्ठं॥ सांगुष्टकेन
चरणाग्रभरेन वस्त्रमाकृष्य चाकुलतया सुरतं चकार॥३५॥ चंक्रमनना सुरतकालिगृहीतवस्त्रा नेत्रे नि
रुध्य च करद्वितयेन तस्य॥ आरोप्य मंजुशयने पुरुषायमाना सानंदयन्कविवरं गुतासर्जनेन॥३६॥ पद्मा
नना चकितबालकुरंगनेत्रा मत्तेभकुंभयुगलस्तनभारनम्रा॥ काश्मीरकेन किल संपुटिना निधेन
बाभुज्यते स्मररणे नरपालपुत्री॥३७॥ सुकोमला चंद्रमुखी च बाला प्रियंवदंती मधुरा च वाणी॥
कृशोदरी गौरविशालनेत्रा दृष्टा तु येशंकरजन्मजन्मनि॥३८॥ चंचत्प्रवालरुचिराहरणा दंतवासा दंतप्रभा
विजितहीरकदंबशोभा॥ संतुष्यते नरकुपीडितकेन नाम्ना कांतेन कौतिकरणेन नरेंद्रपुत्री॥३९॥ चूत
प्रवालकरपल्लवकेलिरम्या वामांगना सुगतिनिर्जितराजहंसी॥ पद्मासना यकरणे श्रमनो विनोदैः
संगम्यते सुकविना क्षितिपालपुत्री॥४०॥ उद्यन्मृगेंद्रतनुमध्यविभावरांगी सर्वांगदत्तसुमनाः सु
भगा सुशीला॥ सा सिद्धुनामुपगता नरराजपुत्री स्त्रीपुंसां सुकविना यदिशि क्षितिलात॥४१॥ हा ता
गतेन्करेण नकवीश्वरस्य सारम्पतेरतिकलाकुशला निशीथे॥ सौंदर्यरूपगुणगौरवं च सर्वं तस्मै समर्प

नपहिगरहस्तिणार्थे ॥४२॥

प२



+ वीरोपि कंचुकिवरः स्मरभिन्नमर्मा स्मर्मापि संश्रुतिन संसदि दूरदुःखात् ॥ काश्मीरकस्य सुकवेश्चरिते क्षणाय भयोन्य
दाशाङ्कि कलानिलयं जमाम ॥४१॥ + सुभुच मेपि कुपितासि न मंत्रितं मे येपि कथाप्यपुरुषतां सुरभिः सगाथा ॥ रामंगं
विमुच्य मयि संगिनि नम्रमौलौ दृष्टे प्रसीद भवती चिरदाहसा दा ॥४२॥
उन्निद्रचंपककविशुद्धसुवर्णवर्णा कर्णांतगस्मरसरोरुहचारुनेत्रा ॥ रंरम्यते सुरतिनागरिकेण नाम्ना श्रीबिल्ह
णेन कविना नरपालपुत्री ॥४३॥ तद्भावसूचितमनंगरसप्रसादं चाटू क्ति नल्पलवियोगसुदुःसहं च ॥ प्रेम
प्रवृद्धमितरेतरमप्रमेयं कामामयोरनुपमेयमतैरखे भूव ॥४४॥ उत्तुंगपीवरघनस्तनमंडलेन बिंबाधरेण सम
णे४ णाढ्चिजखंडिनेन ॥ उत्तंगेन कांतपरिरत्तनखक्षतेन गुप्तांतरक्षिभिरलक्षितपरोपभुक्ता ॥४५॥ आ मा मुसा प्रत
महाकुपितो विधाता व्यक्तीकृतेति हृदि ततः प्रतिपसे नृपः ॥ देवाभयशशिकलापुरुषोपभुक्ता सत्वापते
मी सगुरुः [illegible] क्षितल एव नूनम् ॥४६॥ रक्षाजनेन कविना मनिवेदितेन भूयो बभूव किल दोलितचित्तवृत्तिः
किं सत्यमास्ति कथितं वितथं नु किं वा जीवामि यद्दितयमेव कविः सुतामे ॥४७॥ विद्यानवद्यपतमन्मथ
चाटुवाक्यैः कंदर्पकेलिकुपिता नरराजपुत्रीम् ॥ पुष्पेषुबाणविधुरीकृतमानसोयं कामी प्रसादयति चं
द्रक्कलापवेषं ॥४८॥ यावत्प्रसादललितां नृपआह तावत्त्वं कामप्रसादमसि दुष्टचरित्रभावैः ॥ स्मु
लेति लक्षचरितो निजचौर्यवृत्तिं सावामादृशा निजकरेण मम दृशीष्वं ॥४९॥ उत्थाप संमुखगतो
क्षिप्रोवगुप्तमेतं प्राह धीरमनसा नृपतिं सचक्षुः ॥ कांतापितापयति यः कुपितो जनो यं येन प्रसा
दयति देवविचारयार्थं ॥५०॥ विद्या मयस्य चवनेन तदिदं निशम्य वातोद्भुतेव सहसा कृदतीव कंपे ॥
+ वाक्यं कवेरितिनिशम्य निरीक्ष्य चक्षुरर्थं विचार्य बहुधा नृपतिः प्रतीसः ॥ श्री भारतं विषयवासविलासलीलं नित्यं जगाम सरपा
क्ष ममेव दुःखं ॥५१॥ पुत्री नृपस्य नरनाथमथप्रणम्य प्रोवाच गद्गदवचः शृणु तस्य तत्त्वं ॥ विद्यावतो मम गुरुर्गुणवान् सुभाति
तं वीक्षितुं गुणवतीमपि मां क्षमाते ॥५२॥ भूपं ममाप्य वदती दुकुलांसभीतः कांतं ममाप्नुमयेथाकुशलं दुरापं ॥ म स्रु स्वदीयावरलघटि

ऋपि दे संगासस्तथात्रयादेवत्तिपिताभेवेदं ॥५३॥ १

प भि२

पूर्वंगति नृहंसीं चकार रमणां निरीक्ष्यमाणां तांबूलशोभितकरापि वरांगनाभिः ॥५१॥ श्रेयो वरं मयि जीवितनाथना

॥५४॥ पिथ्यत्वं विपरिस्य जनस्य मां न कृता पराध्वा ॥ सूक्ष्मो धर्मगतिरस्ति विचारपत्त्वं जीवाकिरमैतो विरहान्मूहूर्तं ॥ ण२

॥५२॥ सौदामिनी भवति किं जलदप्रयाते चास्तंगते शशिनि तिष्ठति चंद्रिका किं ॥ हे जीवितेशरतिदायक

कामकांत जीवामि न क्षणमदर्शनतस्तवाहं ॥५३॥ बाले त्वमेव शरणं मरणेपि भूयान्मत्सुर्भविष्यति

जनस्य च मादृशस्य ॥ नृपाद्धिपतिरिह राजगतानि मेषधर्मस्त्वदेति सुदृढं हृदयं चकार ॥५४॥ निर्वास

नं स्वनगरा[illegible]रपृष्ठयानेनाशु करस्य वधबंधनकेसमस्तं ॥ अंगीचकार कुसमेषु निपीडितांगः का

२७ श्मीरको नृपसुतारमणाय गूढः ॥५५॥ खेदं नयाति दधती स्वजनेन लोकेऽपि परस्त्रीरताः किल भ

वंति नरा विमूढाः ॥ सा सा सती परममूर्तिमती च गंगा वामांग एव वहति च शिवं शिवोपि ॥५६॥ अंगी

विधाय सपदि वे चाशिवतरा वा काश्मीरकः शाश्वकलारमते नथैव ॥ नृपः कविः कतिपयेषु दिनेषु दूती

वक्रेणातेन गदितश्च पुरोहितेन ॥५७॥ अलमिति चपलत्वात्स्वप्नमायोपमत्वात्परिणतिविरस

त्वात्संगमेन प्रियायाः ॥ इति पदशतवचस्त्वमालोचयामस्तदपि न हरिणाक्षीं विस्मरसे नरा

स्पो ॥५८॥ केवा न संति भुवि वारिरुहावतंसा हंसावलीवलयिनो जलसन्निवेशाः ॥ किं चातकः पल

रा ६

मवेक्ष्यसकज्जधारां पौरंदरीं कलयते नववारिधारां ॥५९॥ श्रुत्वा कवींद्रवचनं नृपपूज्यविप्रो राजांति
२ कं पुनरगाच्छ्रुतसर्ववृत्तः ॥ संप्राप्य भूपमितेषु जनेषु सत्सु दूते मनोगतवचस्यपुरः पुरोधाः ॥६०॥
श्रीवीरसिंहनृपवीरविपक्षवीरमत्तेभसिंह नरसिंह नरेंद्रसिंह ॥ वैदेशिकः स्वकुललांछनतां विधत्तेन
२ द्वौ [illegible] किंस्मरसि किंश्रुतमेव नास्ति ॥६१॥ वंशार्चितेन कथितेन वचनेन वीरो जज्वाल वह्निरिव वातविव
द्धवेगः ॥ आनीय तद्गृहसखीश्चरितं च दृष्टुताभ्यः समस्तमपि भूपतिरास साद ॥६२॥ ज्ञात्वा च
मनर्थ६ यं स कुलपर्थमूलं प्रोवाच रोषवशगः शुन मंत्रिणस्तान् ॥ चोरस्य किं भवति मंत्रिभिरेवमुक्तो भूलाधि
रोहणमिति क्रियतां च तस्य ॥६३॥ भूपाज्ञया सपदि वर्षधरैर्विगाढं तन्नीयमानमुपलक्ष्य जनस्त्व
वोचत् ॥ चोरः किमेष सुकविः प्रचुरत्नहारी लोकोक्तिरेवमभवन्नगरे समस्ते ॥६४॥ द्वारस्थिता
मथ निरीक्ष्य नरेंद्रपुत्री नेत्रेच्छदं प्रदधती स उवाच कांता ॥ बालेधुना सुरवधूरमणाय यामि न त्वागमि
ष्यामि पुनः कविबिल्हणस्त्वां ॥६५॥ नार्या नरेंद्रतनया गुरुवीक्षणार्थं कुर्वत्यपी च गमने सविलासली
लां ॥ काचित्करेण दधती परिधानवस्त्रं काचिद्विमुंचति करादपि कंचुकीं च ॥६६॥ योषिन्निजोध्वगतवी
क्षत वीक्षणार्थमादर्शमेव दधती स्वकरेण चान्या ॥ का[illegible]ग नार्धगुपितां कबरीं करेणापीनोन्नतस्तनतट
पं

पूर्व० ति ॥२॥ त्वरितंविधाय ॥६७॥ एकंविधायजतुरंगविरजितंचपादंद्वितीयमपशापरिहाययाति ॥ आनंजनेचमप
रानसुकृज्जलेननदृशनाहितमनाह्रियययोगवास्तं ॥६८॥ तद्दर्शनायविविधाद्विजराजयस्तानानाविधा
श्चविबुधाअपिबाहुजाश्च ॥ वैश्याश्चसेवकजनानृपसेवकाश्चचन्येप्रदुद्रुवुरितिगोविधिरेवमुक्तो ॥६९॥
तांबूलमेवदधतीस्वकरेणकापिहारावलीमधततत्रपराकृशांगी ॥ आलिंग्यबाहुलतयास्वसंचकंठे रंधी ४
योषित्प्रगच्छतिगवाक्षपथंसलीलं ॥७०॥ कामीसचापिनरराजनिदेशातस्तैर्वंध्यावनीप्रतिगुरोरभिनी
यमानः ॥ दृष्टोजनैःसकरुणंसुवरांगनाभिरंतःतदाशीर्वशिवेतिविमोचयेनं ॥७१॥ वंध्यावनीमथनि
रोपितमूलरौद्रंनीत्वाकचित्तुवधकाःकृपयाबभूवुः ॥ स्नानंविधेहिपरिचिंतयदैवमाद्यमंतंमतिर्न
वतियासुकवेगतिःसा ॥७२॥ संसारदुस्तरपयोनिधितारणायध्यायंतियंविविधयोगरतामुनींद्राः ॥
यःसर्वलोकहृदंबुजकोशहंसस्तंसर्वगंस्मरसदैवविमुक्तिहेतुम् ॥७३॥ लोकोक्तिषुस्थितवतीषु
जनेषुसत्सुतामेवपश्यतिपुरोपिचपृष्ठतोपि ॥ चित्तेस्थितामथनपश्यसुतांविचिंत्यसद्यापितोनहिवे
म्मिनदैवमाद्यम् ॥७४॥ इतिश्रीबिल्हणस्यपूर्वचतुःसप्ततिःसमाप्ता ॥ अथचोरपंचाशिका ॥
+ इत्थंमनःस्वजनमभ्यागतोविध्यायमामाशुशुद्धिनिनिरिवलेनचकिंचदूचे ॥ तूष्णींस्थितंतमथवीक्षतथोचुरस्यपूर्वं राम०
ततःस्मरसिकिंजगदीशमेकं ॥७५॥१ ॥९॥

श्रीगणेशायनमः ॥ चिंतयामि कांतां राजपुत्रीं। तच्छब्दः पूर्ववस्तुपरामर्शी। शशिकलेति नाम्नी। क्व अद्यापि
मरणसमयेपि। इति योज्यं। पुनः किंभूतां तां। सुप्तोत्थितां। रात्रिजागरणाच्चिरं सुप्तोत्थिता। अत एव म
दनविह्वलसालसांगीं। मदेन विह्वलं अलसं अंगं यस्याः। पुनः किं विशिष्टां। कनकचंपकदामगौरीं। एतेन ला
वण्यगात्रस्योक्तं भवति। कर्णोत्कर्षश्च। पुनः किंभूतां। फुल्लारविंदवदनां। विकसितपद्मसदृशमुखीं। पुनः क
थंभूतां। तनुरोमराजीं। यथा। अस्याः कुचशैलोपरि भ्रमणाक्रमेणादृष्टमयूरपदांकनकस्तनसहसोपसन्ना
सभुजंगीस्तनद्वयसंचयाधिरुध्याप्रसंगं गंभीरविवराशया सूक्ष्मतामुपगम्य नाभिविवरं प्रविष्टे सा श्लाघ्यते।
तनुरोमराजीमिव चिंतयामि। तां विद्यामिव। किंभूतां। विद्याप्रमादगलितां। अवध्यानेन विस्मृता इत्युक्त्वाग्रिमश्लोकमाह ॥१॥

॥श्री॥ अद्यापि तां कनकचंपकदामगौरीं फुल्लारविंदवदनां तनुरोमराजीं॥ सुप्तोत्थितां मदनविह्वलसाल
॥सांगीं विद्यां प्रमादगलितामिव चिंतयामि॥१॥ अ॰ तां शशिमुखीं नवयौवनाढ्यां पीनस्तनीं पुनरहं यदि
॥गौरकांतिं॥ पश्यामि मन्मथशरानलपीडितांगीं गात्राणि संप्रति करोमि सुशीतलानि॥२॥

अद्यापि तां शशिमुखीमिति। पुनरप्यहं यदि तां तथाभूतां पूर्ववस्थागतां पश्यामि। तदा संप्रत्येव करोमि। कानि। किंवि
शिष्टानि सुशीतलानि। निशोपनं च शीतलं चेति सुशीतलं। तानि सुशीतलानि इति पदयोजना। किंविशिष्टां। चंद्रला
वण्ययुक्तवदनां। अत एव शशिसंयोगात् सुशीतलानि गात्राणि करोमीत्याशयः। पुनः किंभूतां। नवयौवनाढ्यां। प्र
थमतारुण्येन दर्शनीयशरीरां। पुनः किंभूतां॥ गौरकांतिं। अत्यंतगौरवर्णां। पुनः कथंभूतां। मन्मथशरानलपीडितांगीं॥

कामाग्निनादह्यमानगात्राम ॥२॥

११

चौ०पं०टी० अद्यापितांयदिपुनरिति। तांपश्यामि। तदायथेष्टंस्वेच्छया निवारितः। तद्वक्त्रंपिबामि। वक्त्रपानेनिमित्तादि
॥६॥ चुंबनेदर्शितं। भगवस्यन्यथावक्त्रपानंनसंभवति। किंकृत्वापिबामि। संपीड्यबाहूयुगलेन। एतेनआलि
गनेदर्शितं॥ उन्मत्तवत्। उन्मत्तस्यपानादिषुज्ञानोत्पत्तिर्नास्ति। कथंभूतां तां कमलायताक्षीं। कमल
पत्रावद्दीर्घनेत्रां। एतेनराजलक्षणयुक्तं। राजपुत्रीशापतः। पुनः कथंभूतां। पीवरपयोधरभा
रखिन्नां। स्थूलतरस्तनकलशयुगलभारार्त्तां। यथाइवार्थः। केइव मधुकरइति किं। कमलेकिंभूतं। यथे
ष्टं। भीतयथापीतकमलांतर्गतमधं तेपीतमिसन्वयः॥३॥ अद्यापितांस्मरामि। तांनिधुवनेसुरतश्र

॥अद्यापितांयदिपुनःकमलायताक्षीं पश्यामिपीवरपयोधरभारखिन्नां॥संपीड्यबाहुयुगलेन
॥पिबामिवक्त्रमुन्मत्तवन्मधुकरःकमलेयथेष्टं॥३॥अद्यापितांनिधुवनेश्रमनिःसहांगी
॥मापांडुगंडपतितालककुंतलालीम्॥प्रच्छन्नपापकृतमंथरमावहंतीं कंठावशक्तमृदुबाहुल
तांस्मरामि॥४॥

ता। कथंभूतां तां। श्रमनिःसहांगीं। असंतसुरतोपगतग्लान्यानिःसहमंगंयस्याः तांश्रमनिःसहांगीं।
पुनः किंभूतां तां। आपांडुगंडपतितालककुंतलालीं। स्मरवस्थासूचकास्वेतपांडुरकपोलस्थलपतितालक
कुंतलपंक्तिं। पुनः किंभूतां। कंठावशक्तमृदुबाहुलतां ममैवकंठे सुरतपरिसमाप्तौ लग्नकोमलबाहु
वल्लिलतिकां। पुनः किंभूतां। अवहंती। किंतत्। प्रच्छन्नपापकृतमिव। कृमतः प्रच्छन्नंचतत्पापंचेति
गुप्तपापमिवकृत। एतेनासंतखिन्नोपगतमानेसा तामान्ये॥६॥॥

राम
॥६॥

अद्यापितांराजपुत्रींस्मरामि॥ क उषसि। प्रातःसमये। कथंभूतां। सुरतजागाघूर्णमानतिर्यग्वलंतर
लतारकंदीर्घनेत्रां। सुरतेनजागरणं सुरतजागरं। तेजातिघूर्णमानमत्तातिततेतारकंतिर्यग्वलंचक
भूप भवति। तरलतारकंनेत्रंयस्याः सा तयोक्ता। पुनः किंविशिष्टां। शृंगारसारकमलाकरराजहंसीं।
शृंगारस्यसारगृहं। शृंगारसारगृहंशृंगारसारं। तदेवकमलाकरं। केलिनुसरोवरं। तस्यराजहंसीमिववि
हरणशीलां। एतेनोत्तमजातिः। पद्मिनीस्त्रुक्ता भवति। पुनः कथंभूतां। व्रीडाविनम्रवदनां। लज्जावेतान
मुन्नं। तन्निवृत्तमनुभूय। उषःसमये। मुखंदर्शयितुं। नशक्नोतीस्पुन्नं। स्त्रीलक्षणं॥५॥ अद्यापितांय

॥अद्यापितांसुरतजागरघूर्णमानतिर्यग्वलंतरलतारकदीर्घनेत्रां॥ शृंगारसारकमलाकरराज
॥हंसींव्रीडाविनम्रवदनांसुमुखींस्मरामि॥५॥ अद्यापितांयदिपुनःकमलायताक्षींपश्यामिदीर्घ
॥विरहज्वलितांगयष्टिं॥ अंगैरहंसमुपगुह्यततोतिबाढनोन्मीलयामिनयनेनचतांत्यजामि॥६॥

द्यहंराजपुत्रींपश्यामि। ततोनमीलयामि। केनयनेलोचनद्वयं। नजातुत्यजामीतिपदयोजना। किंकृत्वा
समुपगुह्यबाढंप्रेमातिशयेनातिदृढतरकैः अंगैः सर्वैरेवप्रसंगैः। कथंभूतांतां। दीर्घेविरहज्वलितांग
यष्टिंबहुकालेनाचितेननवज्वलितज्वालाभिभूतांगा। चेअन्योपियः कश्चिदुच्चरितपुरुषांतरंनगाढमा
लिंग्यते। सोपिविगतज्वरोभवतिइतिवैयमतंकुत्रापिपुनः कथंभूतां। श्रवणायताक्षी। कर्णपर्यंतदीर्घनेत्रा॥६॥

अद्यापितांतन्वींस्मरामीतियोज्यं। कथंभूतांपूर्णेंदुसुंदरमुखीं। पूर्णचंद्रलावण्यमुक्तवदनां। पुनः कथंभूतां। मदनविह्वलांगीं। मदाहर्षस्तेनविह्वलमंगंयस्याः। पुनः कथंभूतां। व्यालोलकुंडलकलापतेनोपरिस्थिक संभोगयुक्तो भवति। पुनः कथंभूताम्। सुरतताण्डवसूत्रधारीम्। बंधापबंधादिमोचनकरी। अतएववि परीतरताभिज्ञतेस्याः ॥७॥ स्मरामिक्कशयनेमाहाहंसशय्यायामितियोज्यं। कथंभूतां। मसृणचंदनपंकमि

॥ अद्यापितांसुरतताण्डवसूत्रधारींपूर्णेंदुसुंदरमुखींमदविह्वलांगीं। तन्वींविशालजघनस्त
॥ नभारनम्रांव्यालोलकुंडलकलापवतींस्मरामि ॥७॥ अद्यापितांमसृणचंदनपंकमिश्रकस्तूरि
॥ कापरिमलोत्थविसर्पिगंधां। अन्योन्यचंचुपुटचुंबनलग्नपक्ष्मयुग्माभिरामनयनांशयनेस्मरा
॥मि॥ ८॥

श्रकस्तूरिकापरिमलोत्थविसर्पगंधां॥ सूक्ष्मतरपंकरूपमलयजचंदनेनान्वितकस्तूरिकासौरभजनितविस्तारिगंधां। पुनः कथंभूतां। अन्योन्यचंचुपुटचुंबनलग्नपक्ष्मयुग्माभिराम नयनां। परस्पराधरोष्टपानाभ्यांचुंबनंतेनातिशयितानंदभरपक्ष्मयुगलरम्यतरनेत्रामिति ॥८॥

अद्यापि स्मरामि। किं विधुवने सुरतसंगमे। किं विशिष्टां। मधुरिग्धमुग्धलीडाधरां। मधुमद्येतेन संपृक्तं मनोहरं
आस्वादितमधुरं यस्याः तां। यथा। पुनः कथंभूतां। कृशांतनुं। क्षामशरीरां। पुनः कथंभूतां। चपलायताक्षीं।
चंचलितदीर्घनेत्रां। पुनः किं विशिष्टां। काश्मीरपंकमृगनाभिकृतांगरागां। कुंकुमकसूंधूरकस्तूरिकाभिः
कृतगात्रविलेपनां। पुनः कथंभूतां। कर्पूरपूगपरिपूर्णमुखीं। कर्पूरपूगाभ्यां परिपूरितं मुखकमलं य
स्याः सा तथोक्ता ॥१॥ अद्यापि स्मरामि। किं तत्। तत्किं मुखमिसेध्याहार्यं। कस्याः प्रियायाः मम

॥ अद्यापि तां निधुवने मधुदिग्धमुग्धलीडाधरां कृशतनुं चपलायताक्षीं। काश्मीरपंकमृग
॥ नाभिकृतांगरागां कर्पूरपूगपरिपूर्णमुखीं स्मरामि ॥१॥ अद्यापि तां कनकगौरकृतांगरागां
॥ प्रस्वेदबिंदुविततां च मम प्रियायाः ॥ अंते स्मरामि रतिखेदविलोलनेत्रं राहूपरागपरिमुक्त
॥ मिवेंदुबिंबं ॥१०॥

इति योजना। किंभूतं सुखं। कनकगौरकृतांतरागां। कनकवद्गौरं। कुंकुममिति च कोशः। तेन कृतांगराग
मुद्वर्तितां। पुनः कथंभूतां। प्रस्वेदबिंदुविततां। रतिश्रमजनितप्रस्वेदकणिकाव्याप्तां। क। अंते अवसा
ने सुरतेऽपि च। पुनः किंभूतं मुखं। रतिखेदविलोलनेत्रं रतिनेव खेदचंचलं नेत्रयुगलं यत्र मुखे। उ
घोपमीयते। कमिव। तन्मुखं। इंदुबिंबमिव चंद्रमंडलमिव। किंभूतं। इंदुबिंबं। राहूपरागपरिमुक्तं। राहो

गता। राहूपरागो तेन परिमुक्तं। निपीतरसोऽम
तएववर्ण्यस्यं। कुमारलक्षणेन मुखेन सह
साम्य ॥१०॥

चौ० टी०
॥८॥

अद्यापिसंप्रतिवर्त्तते। क्व मनसि चित्ते। कस्यमेममकिंतत्। तत्किंतयाक्षितिपालपुत्र्याकृतं॥ किंकृतम्। कर्न कृपत्रं तालपत्रं विशेषं। किंकृत्वा परिहृत्य। सत्का॥ कथंभूतायाराजपुत्र्या। अनालपंत्या॥ अभाषमाणया। किंअनालपंत्यामंगलवचः किंभूतं। जीवेति। प्रागवस्थायामुद्भूतकेलिकलहोपजातक्रोधवशेन कर्णादपनीतभूमौ स्थितं। पश्चाद्रात्रौमयिक्षुतवतिनेदं नर्मेति मनसि संधाय। अवैधव्यप्रेमातिशयेन सूचकत्वेनपुनरपिकर्णयातिथ्यिस्तुतवसोभिप्रापस्तस्यमेमनसिसंप्रतिवर्त्तत इति भावः॥११॥ अद्यापिस्मरामि।

॥अद्यापितन्मनसिसंप्रतिवर्त्ततेमेरात्रौमयिक्षुतवतिक्षितिपालपुत्र्या॥ जीवेतिमंगलवचः परि
॥हृत्यकोपात्कर्णेकृतंकनकपत्रमनालपंत्या॥११॥ अद्यापितत्कनककुंडलघृष्टगंडमास्यंस्म
॥रामिविपरीतरताभियोगे॥ आंदोलनश्रमजलस्फुरसांद्रबिंदुमुक्ताफलप्रकरविच्छुरितंप्रि

किंतत्। आस्यंमुखं। कस्याः प्रियायाः। क्व। विपरीतरताभियोगे॥ अपरिष्ठकसंभोगप्रवृत्तोद्युक्तियोगेनाकिंचित्श्लिष्टं। कथंभूतंआस्यं। कनककुंडलघृष्टगंडं। स्वर्णकुंडलचिन्हितं। कपोलंच। पुनः किंविशिष्टं। आंदोलनश्रमजलस्फुरसांद्रबिंदुमुक्ताफलप्रकरविच्छुरितं। कुंडलद्वयं। तेनआंदोलनेनपुनः पुनश्चालनेनश्रममम्। तज्जनितश्रमजनितप्रस्वेदजलेनव्यक्तघनतरबिंदुभिः मुक्ताफलसमूहव्याप्तं॥१२॥

राम०
॥८॥

16

अद्यापिस्मरामि।कस्याःतस्याःममवल्लभायाइतियोज्यं।प्रणयभंगुरदृष्टिपातंप्रणयेन।मानानुरागेसति।भं
गुरं॥वक्रीभूतमवलोकितं।पुनःकिंभूतं।रतिविभ्रमगात्रभंगं।रतिविलासेनैवशरीरचालनंसंगतत्वात्।पु
नःकिंस्मरामि।वस्त्रांचलस्खलनचारुपयोधरांतं।दिव्यवस्त्रांचलेनातीवरम्यतरंपयोधरस्यांतमेकदे
शंच।पुनःकिं।दंतच्छदंच।अधरदलंपुनःकथंभूतं।दशनखंडनमंडनं।दंतव्रणालंकृतं।चकारःसमुच्चयार्थः॥१३॥

॥अद्यापितत्प्रणयभंगुरदृष्टिपातंतस्याःस्मरामिरतिविभ्रमगात्रभंगं॥वस्त्रांचलस्खलनचा
॥रुपयोधरांतंदंतच्छदंदशनखंडनमंडनंच॥१३॥अद्याप्यशोकनवपल्लवरक्तहस्तांमुक्ताफ
॥लप्रचयचुंबितचूबुकाग्रां॥अंतस्मितोच्छ्वसितपांडुरगंडभित्तिंतांवल्लभामलसहंसगतांस्म
रामि॥१४॥

अद्यापितांवल्लभांस्मरामि।कथंभूतां।अशोकनवपल्लवरक्तहस्तां।अशोकस्यनूतनत्वात्।रक्तंनखकं
पाणियुगलंयस्यास्तां।पुनःकथंभूतां॥मुक्ताफलप्रचयचुंबितचूबुकाग्रां।मुक्ताफलसमूहेहारद्वयेन।चुं
बितमलंकृतं।स्तनद्वयाग्रभागः।किंविशिष्टां।अंतस्मितोच्छसितपांडुरगंडभित्तिं।अंतरीसद्धसनेनो
च्छ्वसितपांडुरधूसरतांगतं।कंठमितियस्यास्तां।पुनःकथंभूतां।अलसहंसगतिं।मंदहंसगम
नो।हंसःप्रकृत्यामंदगतिर्भवति।मंदगतित्वेनतस्यातीवजघनतराच्चअलसगमनमुक्तंभव
ति॥१४॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥

17

चौ॰ टी॰
॥९॥

अद्यापि तत्स्मरामि। किं नरवरक्षतः लक्ष्म कस्याः तस्याः प्रियाया इति योजना। नरवरक्षतं नखचिह्नं। कथंभूतं न्यस्तं। आरोपितं। क्व। कनकरेणुघनोरुदेशे कनकधूलिचर्चितोरुभागे। ईश्वराणां सुवर्णशालाकाम तं निक्षिप्य चंदनपुष्टिः क्रियते। अतः कनकरेणुयोगो भवति। कथंभूतां आकृष्टहेमरुचिरं सुवर्णाभं पंचरसेन तं तथा भूतं। पुनः कथंभूतं करधृतं। हस्ताभ्यां पिहितं। कस्मात् कुतः स्तनतः प्रदेशात्। तथा स्थानादुत्थाय प्रचलितायाः

॥अद्यापि तां कनककेरणुघनोरुदेशे न्यस्तं स्मरामि नखरक्षतलक्ष्म तस्याः॥ आकृष्टहेमरुचि
॥रांबरमुत्थितायाः लज्जावशात्करधृते च ततो व्रजंत्याः॥१५॥ अद्यापि तां विधृतकज्जल
॥लोलनेत्रां पृथ्वीं प्रभूतकुसुमाकुलकेशपाशां॥ सिंदूरसंलुलितमौक्तिकदंतकांतिं आबद्ध
॥हेमकटकां रहसि स्मरामि॥१६॥

स्पर्थः॥१५॥ अद्यापि तां राजपुत्रीं स्मरामि। क्व रहसि। एकांते इति पदयोजना। कथंभूतां राजपुत्रीं। विधृतलोचनं कज्जललोचनं चेति समासः। तां तथाभूतां। कामिव। पृथ्वीमिव। किंभूतां। प्रभूतकुसुमाकुलकेशपाशां। प्रचुरतरपुष्पकेशसमूहां। पुनः किंभूतां॥ सिंदूरसंललितकांतिं। पीतकदंबकांतिं। पुनः कथंभूतां। आबद्धहेमकटकां। आसमंताद्भावेन सुवर्णकटकं॥ किंकिणीजालकं यथा॥१६॥ श्री रामचंद्र प्रं

राम॰
॥९॥

18

पुनरपितांस्मरामि। क्वरहसिएकांतेतियेजना। कथंभूतां। गलितबंधनकेशपाशां। उद्धातबंधनकेशपाशां।
चेतिनिबोधव्यं। अतएवस्रस्तस्रजकेशपाशांचेति। पुनः कथंभूतां। स्मितसुधामधुराधरोष्ठीं। स्मितनिब
डूसनं। तदेवसुधातया। मधुरंरम्यंअधरोष्ठं। यस्याः सातथोक्ता। पुनः कीदृशींतां। पीनोन्नतस्तनयुगलोपरि
चारुचुंबन्मुक्तावली। पीलसलिलं। उन्नतसुचतरभूतम्। कुचद्वयोपरिचारुयस्याः सांदोलयमुक्ताहारम्॥१७॥

॥अद्यापितांगलितबंधनकेशपाशांस्रस्तस्रजस्मितसुधामधुराधरोष्ठीं॥पीनोन्नतस्तनयुगो
॥परिचारुचुंबन्मुक्तावलीरहसिलोलदृशांस्मरामि॥१७॥अद्यापितांधवलवेश्मनिरत्नदीप
॥मालामयूखपटलैर्दलितांधकारे॥प्राप्तोद्यमेरहसिसन्मुखदर्शनायेलज्जावसाननयनामनु
चिंतयामि॥१८॥

अद्या[redacted]प्यनुचिंतयामि। कांतांराजपुत्रीं। धवलवेश्मनिधवलगृहे। किंभूते। दलितांधकारे। निष्पिता
तिमिरसमूहे। किंरत्नभूतदीपमालामयूखपटलैः। रत्नमेवदीपाः तेषांमालापंक्तयः तासांकिरणसमूहैः प
टलसद्धोत्रतानाजाभिः रत्नप्रतिपादकः। कथंभूतांतां। लज्जावसाननयनां। आत्तचंचललोच
नेयस्याः सातथाभूतां। उतपरिजनसमक्षदर्शनादेव। क्वसतिप्राप्तोद्यमेसति। सुरतोपक्रमसमये
किमर्थं। सन्मुखदर्शनार्थं। स्वयच्छंदम्। स्तनजघननाभिकक्षाभिगुह्यदर्शनाभिलाषकमपि॥१८॥

पू॰चौ॰टी॰
॥१०॥

अद्यापि तां स्मरामि। कांतां सुदतीं। कुंदसदृशवदनां। कथंभूतां। विरहवह्निनिपीडितांगीं। प्रियवियोगसंजनिताग्नि
नादह्यमानशरीरां। अतएव तन्वीं। कामां। पुनः किंभूतां। कुरंगनयनां। कुरंगी। तद्वद्दीर्घे लोचने यस्याः तां। पुनः कथं
भूतां। सुरतैकपात्रीं। सुरतएव पात्री। पात्रभूतां। वतुषष्ठी। कामलोचेतत्वात्। पुनः कथंभूतां। आवहंतीं। हृदयेन धार
यतीं। प्रीतिभावः। नानाविचित्रकृतमंडनम्। पुनः कथंभूताम्। स्वाराजहंसगमनां॥१९॥ अद्यापि तां स्मरामि। तत्किंभूतां।
विहसितां। विशेषेण प्रहसितमुखीं। पुनः किंभूतां। कुचभारनम्रां। स्तनयुगेन नम्रीकृतगात्रीं। पुनः किंविशिष्टां। मुक्ताकला

॥अद्यापि तां विरहवह्निनिपीडितांगीं तन्वीं कुरंगनयनां सुरतैकपात्रीं॥ नानाविचित्रकृतमंडनमावहंतीं
॥स्वाराजहंसगमनां सुदतीं स्मरामि॥१९॥ अद्यापि तां विहसितां कुचभारनम्रां मुक्ताकलापधवलीकृत
॥कंठदेशां॥ तत्केलिमंदरगिरौ कुसुमायुधस्य कांतां स्मरामि रुचिरोज्वलपुष्पकेतुं॥२०॥ अद्यापि चा
॥टुशतमुल्ललितोचितार्थं तस्याः स्मरामि सुरतक्लमविह्वलायाः॥ अव्यक्तनिस्वनितकीरसुकथ्यमान
संकीर्णवर्णरुचिरं वचनं प्रियायाः॥२१॥ प२

पधवलीकृतकंठदेशां। मुक्ताकलापफलसमूहदीप्या उज्वलीकृते कंठभागः। कामिव। रुचिरोज्वलपुष्पकेतुमि
व। अत्र भिन्नलिंगोपमा॥ कस्य कुसुमायुधस्य। कृतकेलिमंदरगिरौः तस्याः केलिः तत्केलिरेव मंदरगिरिस्तत्र
२०॥ अद्यापि स्मरामि। किं वचनं। कस्याः प्रियायाः। चकु अद्यापि इतियोजना। केवलवचः स्मरामि। तच्च किं। चाटु
शतमुल्ललितोचितार्थं। चाटुशतेन मुल्ललितं अर्थयत्। किंविशिष्टायाः। अतिशयितसंभोगजनितग्लान्या।
उद्विग्नचित्तायाः। किंविशिष्टवचनं। अव्यक्तनिःस्वनितकीरसुकथ्यमानसंकीर्णवर्णरुचिरं। गूढशंकितेन मदस्मर

स्वल्पयापाह॥२१॥

अनुचिंतयामि॥ ट्का। अद्यापिनिधनसमयेपिमरणकालेपि॥ नकेवलंनिधनेपि। जन्मांतरेपि। अग्रिमजन्मन्यपि।
कथंभूतां। सुरतचूर्णामीलिताक्षीम्। सुरतेचूर्णितं। भ्रीमिततारकंकिंचिन्निमीलितंच। अक्षिपुटंयस्याः तांत
थाभूतां। पुनः कथंभूतां। स्रस्तांगयष्टिगलितांमुपकेशभारां। निस्सहशरीरत्वेनस्खलितदिव्याचलकवली
मूलवालसमूहां। पुनः कथंभूतां। शृंगारवारिरुहकाननराजहंसीम्। रूपकोमलंकारः॥२२॥ अद्याप्यह
त्यजामि३त्यन्वयः। किं स्वर्गापवर्गजनरराजसुखम्। स्वर्गापवर्गनरराजसुखंचेतिसमासः॥ नरराज

॥ अद्यापितांसुरतचूर्णामीलिताक्षींस्रस्तांगयष्टिगलितांमुपकेशभाराम्॥ शृंगारवारिरुहकान
॥ नराजहंसींजन्मांतरेपिनिधनेथनुचिंतयामि॥२२॥ अद्यापितांप्रणयिनींमृगशावकाक्षींपीयू
॥ षपूर्णकुचकुंभयुगंवहंतीम्॥ पश्याम्यहंयदिपुनर्दिवसावसानेस्वर्गापवर्गनरराजसुखंत्यजामि ॥२३॥

सुखंमनुष्याणांमध्येराजसुखं। भोक्तृतं। यदिपुनः प्रणयिनींपश्यामि॥ ट्का दिवसावसाने॥ संध्यासम
ये। कथंभूतांतां। आवहंतीम्। धारयंतीम्। पीयूषपूर्णकुचकुंभयुगंअमृतपूरितस्तनकलशद्वयम्। एतेना
मृतपूर्णत्वेनस्तनद्वयस्यातीवलोचनयुक्तम्॥ भगवत्यास्तनश्चजीवनप्रत्यासत्तिरिति॥ पुनः कथंभू
ताम्॥ मृगशावकाक्षीम्। बालहरिणस्येवअक्षिणीयस्याः॥२३॥ श्रीगजाननसाक्ष ॥

चौ॰टी॰
॥२१॥

अद्यापितांस्मरामि॥ तां श्रृंगारव्यापारैः। तांकनीयरूपां। क्व अद्यापि इति योजनं॥ कथंभूतां। प्रथमैकरेखां। क्व क्षि-
तितले पृथिव्यां। कया। सर्वांगसुंदरतया। का सां कामिनीनां मध्ये लावण्यातिशया। सर्वगात्रसुंदरतया उद्यतां
गणनायां। आत्मरूपाभिर्भवेयमाकृतिरित्येकरेखामिव। पुनः कथंभूताम्। श्रृंगारनाटकरसोत्तमरत्नपात्रीम्।
श्रृंगारकेलिकर्मोपनयतुल्यसुरतं गाढं कं तत्र रसम्। श्रृंगारनाटकरसोत्तपात्रीम्। प्रस्फुरत्स्वभां। शरीरेनेस-
र्थैः। पुनः कथंभूतां। कुसुमायुधनिर्मितिखिन्नाम्॥ यस्मच्चाएवनिर्मितिः तत्र खिन्नां कृशतरीमिति॥ २८॥ अहं न हि

॥अद्यापितां क्षितलेवरकामिनीनां सर्वांगसुंदरतया प्रथमैकरेखाम्॥ श्रृंगारनाटकरसोत्तमरत्नपात्रीं तस्याः
॥स्मरामि कुसुमायुधचित्तखिन्नां॥ २८॥ अद्यापि तां किमिव तत्र मिमां गलग्नां प्रौढप्रतापमदनानलतप्तदे
॥ हां॥ बालामनाथशरणामनुकंपनीयां प्राणाधिकां क्षणमहं न हि विस्मरामि॥ २९॥

विस्मरामि। कां तां राजपुत्रीम्। क्षणमपि। क्व अद्य। इति योजना। कथंभूताम्। प्राणेभ्यामतिप्रापिताम्। पुनः कथं-
भूताम्। प्रौढप्रतापमदनानलतप्तदेहाम्। अतिशयितेन संतापजनितेन कामाग्निसंतप्तदेहाम्। अत एव। अंगल-
ग्नां कस्यामेवेसध्याहारः। सेसा। कांक्षया। किमिव। स्वजालीढं सूक्ष्मपद्ममिव। विधुतराल्लिंगनमुक्तं भवति।
पुनः कथंभूताम्। बालाम्। षोडशवर्षीयाम्। पुनः कथंभूताम्। अनाथशरणाम्। न विद्यते नाथः रक्षको यस्याः
सा। तथा। अत एवानुकंपनीयां। शोच्यदेशागतामिसर्थः॥ २९॥ श्री रामचंद्राय नमः॥

रा
॥१०

प्रतिचिंतयामि॥ कां तां। राजपुत्रीं। ईस्या कांक्षां न शक्यते न पर्यते किं कर्तुं सोढुं। किं हंहो जनी। मह हो संबंधने तज्ज
न्यं नाम कं। प्रतिमाबुद्धिस्पस्यर्थः। कथंभूतां। स्नेहैकपात्रघटितां। अदासीन्यत्वात्। स वियोगहुताशने॥ कं मध्ये। का
लां वरसुंदरीणां। उत्तमानां नायिकानां मध्ये। कुतः प्रथमतः स्रष्टेः प्राकूलवनिपुमिव सेवकुर्यात्स्नेहरूपत्वात्। इति
पाठांतरव्याख्यानं॥२५॥ अहो विस्मयकरीं। आश्चर्यभूतां। यतो नाम्नाप्यहं धीरः संसक्तोतेपि। वल्लभतरेतिमम
तचिंतयामि। तत्र किं करोमी सन्वेय। बलान्निवर्सते। काबुद्धिः। कुस्पमेवमस्मात्। बलात्। कं। अद्यापि। किं कृत्वा। विहाय।

॥अद्यापि तां प्रथमतो वरसुंदरीणां स्नेहैकपात्रघटितां रचनाशतां धिं॥ हंहो जनाम मसवियोगहुताशने
॥मो सोढुं न शक्यत इति प्रतिचिंतयामि॥२५॥ अद्यापि विस्मयकरे त्रिदशान्विहाय बुद्धिर्बलाच्चलति मे
॥ किमहं करोमि॥ जानन्नपि प्रतिमुहूर्त्तमिहांतकाले संसक्तवल्लभतरेति ममेति धीरा॥२७॥ अद्या
॥पि तां गमनमुत्तरितं लदीयं श्रुत्वैव भीरुहरिणीमिव चंचलाक्षीं॥ वाचस्खलद्विगलदश्रुजलाकु
॥लाक्षीं संचिंतयामि गुरुशोकविनम्रवक्त्रां॥२८॥ ८०॥ को त्रिदशान्। कथं प्रतिमुहूर्तं। क।

इहांतकाले मरणसमयेपि॥२७॥ संचिंतयामि। कां। अद्यापि। कथंभूतां। चंचलाक्षीं। चंचलनेत्रां। कामि
व। भीरुहरिणीमिव। हरिणीस्यातरनयना भवति। किंभूतां। विगलदश्रुजलाकुलाक्षीम्। विशेषेण गल
ता अश्रुजलेनाकुले लोचने यस्याः सा तथा तां। किं कृत्वा। श्रुत्वैव। कां वाचाम दीयं। उत्तरितं। उत्तारितां।
इति वाचं श्रुत्वा। हरिणीव चंचलाक्षी भूता। किं विशिष्टा। वाचस्खलद्विगलदक्षरा इत्यर्थः। पुनः कथंभूतां।
गुरुशोकविनम्रवक्त्राम्। गुरुशोकेनासह्येन यानम्रीभूतमुखपंकजं॥२८॥

चौ०टी०
॥१४॥

नष्टकिंचनसुखं। के। नमयाकथं। कदाचिदपि। एतावत्वेनाकुतः॥ यत्सदृशतः॥ तस्मात्। मत्सदृश्यतः। कथंभूतेन। मयप्रय
यत्नेनविरूपया। कांतां। के। अद्यापि। तां। कथं। सुनिविष्टं। सुखं। सौंदर्यनिर्जितरतिद्विजराजकांतिं। रम्यातयानिर्जिता
राचितपोकांतिः। यभनतया। केनकृत्वा। अतिविमलत्वमहागुणेन। अतिशयेसनैर्मल्यस्फुरणगुणेन। के। इहपृथिव्यां
२९॥ स्मरामि। के। अद्यापि इति। क्षणवियोग। विषोपमेयंपुनर्बहुतरमपियोगसतिविषमिवसंतापदः इदानीम्। कथंभूतां।
बहुतरां। अन्योविषान्तःसन्। अमृतरसावस्थाभवतीत्यर्थः। अतएवजीवस्यधारणकरीं प्राणरक्षणयोग्या। पुनः

॥अद्यापितांसुनिपुणांयततामयापिदृष्टंनयत्सदृशतोवदनंकदाचित्॥ सौंदर्यनिर्जितरतिद्विजराज
॥कांतिंकांतामिहातिविमलत्वमहागुणेन॥२९॥ अद्यापितांक्षणवियोगविषोपमेषांसंगेपुनर्बहु
॥तरामृताभिषेकं॥ तांजीवधारणकरींमदनातपत्रीमुद्वृत्तकेशनिवहांसुदतींस्मरामि॥३०॥ अद्यापि
॥तांस्वभवनान्मयिनीयमानेदुर्वारभीषणकरैर्यमदूतकल्पैः॥ किंकिंतयाबहुविधंनकृतंमदर्थेवक्तुं
॥नपार्यतइतिव्यथतेमनोमे॥३१॥

कथंभूतां। मदनातपत्रीं। मदनएवातपोष्णंभतस्मात्। त्रायतेतिमदनातपत्री। पुनः कथंभूतां। सुदतीं।
शोभनादंतायस्याःसातथाभूतामित्यर्थः॥३०॥ किंकिंबहुविधंकार्यंनकृतं। कया। तयाराजपुत्र्याम
दर्थंममरक्षणहेतोः। नपार्यतेनशक्यते। कुतइतिहेतोः। मथ्यते। किं। मनः। कस्य। मम॥ के। अद्यापि।
कस्मिन्सति। मयिनीयमानेसति। कस्मात्। स्वभवनात्। शयनगृहात्। दैवकैः। पूर्वोक्तैः। नायकपुरुषैः। ये

[illegible]
राम
॥१॥

अपि दुनोति। दुखंप्राप्नोति। किं हृदयं। कस्या मे। मम। किं कर्त्तुं। पूर्णेंदुसुंदरमुखं। कुतः। न विलोक्यते। कथंभूतः।
भूयः पुनरपि कः प्रतिमुहुः। वारंवारं। कस्याः ममवल्लभायाः। के निशि। दिवारात्रौ। लावण्यनिर्जितसुधाशयश
रच्चंद्रवत्कांत॥ लावण्येन जिता। अमृताशयदीप्तिजेन। ताम्। तथा॥ ३२॥ अद्यापि संचिंतयामि। कांतां पु
वतीं। ताद्रूप्ये लिंगधारिणीं। केन। मनसा। चित्तेन। अन्येषामपि परोक्षा विस्मृतवस्तुचित्तानां। चित्तसेवः प
रमेवस्यन्वयः। कथंभूतां। अवहितां। सावधानभूतां। चिंतयामीत्यर्थः। कथंभूतेन मनसा बलेन॥ पुनः

॥ अद्यापि तां निशि दिवा हृदयं दुनोति पूर्णेंदुसुंदरमुखं मम वल्लभायाः॥ लावण्यनिर्जितसुधाश
॥ यचंद्रकांतिं भूयः पुनः प्रतिमूहूर्त्तविलोक्यनेयत्॥ ३२॥ अद्यापि तामवहितां मनसा बलेन संचित
॥ यापियुवतीं मम जीविताशां॥ नान्योपभुक्तनवयौवनभारहारां जन्मांतरेपि मम सैव गतिस्तथा
॥ स्यात्॥ ३३॥ अद्यापि तद्वदनपंकजगंधलुब्धभ्राम्यद्द्विरेफचयचुंबितगंडदेशां॥ केशावधूत
॥ करपल्लवकंकणानां क्वाणो विमूर्छति मनः सुतरां मदीयं॥ ३४॥

कथंभूतां। नान्योपभुक्तनवयौवनभारहारां॥ पुरुषांतरेण। अन्योपभुक्त उपयोगीकृत एव न भारः यस्याः
सा तथा तां॥ ३३॥ अद्यापि मूर्छति। मोहयुक्तं करोति। कः। क्वाणः। शब्दः। किं मनः। मदीयं। सुतरां अतिश
येन। केषां कंकण्या भूता। करपल्लवकंकणानां। विलपस्या। तान्स्मृत्वाउस्यधाहारः। किं विशिष्टां तां। तद्वदनगं
धपंकजलुब्धभ्राम्यद्द्विरेफचयचुंबितगंडदेशां। तस्याः वदनपंकजं तस्य गंधलुब्धेन लोभयुक्तो॥ ३४

चौ० टी०
॥१३॥

स्मरामि। कां। अद्यापि रतिपदयोजनां। किंतन्न। यद्दत्तं किं। नखपदं। केन। मया। क्कस्तनमंडले। गाढतरालिंगि
तवशान्मंडलाकृतिः स्तनयुग्मे। कथंभूतेन मया। आस्यमधुपानविमोहितेन। मुखकमलमधुपाना
द्भूतेन चित्तेन। तदेव नखपदं सा रक्षति॥ विलोकयति जागर्ति च। कैः कृत्वा। उद्भिन्नरोमपुलकैः। कूप
भूतैः बहुभिः। कृतैः। समन्तात्सर्वगात्रेषु। अथवा प्रयत्नादिति पाठांतरे। महतायत्नेन। जागर्ति रक्षति। वि

॥ अद्यापि तां नखपदं स्तनमंडले नद्दत्तं मयास्यमधुपानविमोहितेन। उद्भिन्नरोमपुलकैर्बहु
॥ भिः समन्ताज्जागर्ति रक्षति विलोकयति स्मरामि ॥ ३४ ॥ अद्यापि रोषितमुखीमकृतगन्तुकामां
॥ नोक्तंवचः प्रतिददाति यदैव वक्त्रं। चुंबामि रोदिति भृशं पतितोऽस्मि पादे दासस्तव प्रियतमे
भजतां स्मरिष्ये ॥ ३५ ॥

लोकयति। पीनः पुलकेन। प्रेमातिशयनेति ॥ ३४ ॥ अद्यापि स्मरामि। कां। तां राजपुत्रीं। कथंभूतां। रो
षितमुखीं। क्रुद्धमुखीं। पुनः कथंभूतां। कृतगंतुकामां। कृतगमनं गंतुं यया सा। तां। तथोक्तां। यदा
यदैव वक्त्रं वचो न प्रददाति। किंभूतं। उक्तं। गदितं। तदैवाहं चुंबामि। मुखकमलमित्यर्थः। यदा भृशं
रोदिति। तदा पतितोऽस्मि। क्क। पादे। चरणयुगले। प्रियतमे मां भजतां। तवदासोऽस्मि। इत्यादिक्रोधा
मयवाक्यं स्मरिष्ये ॥ ३५ ॥

राम
॥१३॥

26

धावति। किं मनः। क। अद्यापि। किं करोमीति योजना। कुतः। हि अस्माद्धेतोः। धावति गच्छति। जातु कोऽपि मदीयः कालः मम समयः। सार्धं सखीभिः। क। वासगृहे। कथंभूते। सुकान्ते शोभने च कान्ते चेति समानः। कथंभूतो मदीयः कालः। कान्ताङ्गसङ्गपरिहासविचित्रनृत्यक्रीडाभिरामः इव। कान्तायाः अङ्गसङ्गे परिरम्भे परिहासः खेलः उत्कण्ठा नानाप्रकाराः नृत्यक्रीडावतोऽभ्यासः रामः। सौख्यजनकः रम्यं त इति समासः ॥३७॥ खलु निश्चयेन न वेद्मि। न जानामि। कान्तां राजपुत्रीं। क। अद्यापि इति योजना। ईशपत्नी पार्वती ॥ वा सुरपतेरिन्द्रस्य शचीवा। किंविशिष्टा सा पार्वती। कस्याः तितीव्रतपसः। शापान्मनुष्यत्वं प्राप्ते त्यर्थः। अथ कृष्णस्य लक्ष्मीरिति वितर्कयेद् गुह्य शापाद्

॥ अद्यापि धावति मनः किमहं करोमि सार्धं सखीभिरिति वासगृहे सुकान्ते ॥ कान्ताङ्गसङ्गपरिहासवि
॥ चित्रनृत्यक्रीडाभिराम इति जातु मदीयकालः ॥३७॥ अद्यापि तां न खलु वेद्मि किमीशपत्नी शापाद्गता
॥ सुरपतेरथ कृष्णलक्ष्मीः ॥ धात्रैव किं नु जगतः परिमोहनाय सा निर्मिता युवतिरत्नदिदृक्षया वा ॥३८॥
॥ अद्यापि तां जगति वर्णयितुं न कश्चिच्छक्नोत्यदृष्टसदृशीं प्रतिबिम्बहीनाम् ॥ दृष्टं तयोः खलु येन रूपं शक्नो
भवेद्यदि स एव परो न चान्यः ॥३९॥

गता। शापादागता इति समासः। किं नु धात्रैव निर्मितेति भावः। कस्मै मोहनाय। कस्य जगतः। संसारस्य। कया। युवतिरत्नदिदृक्षया। वा समुच्चये बोध्यः ॥३८॥ कश्चित् सरूपो न क्रोति। शक्तो न भवति। किं कर्तुं वर्णयितुं। कां तां। क। अद्यापि। विरहदशायामपि। क। जगति संसारे। कथंभूतां। अदृष्टसदृशीं। न दृष्टं सदृशं प्रतिरूपं यस्याः सा तथा तां। पुनः कथंभूतां। प्रतिबिम्बहीनां। द्वितीयशरीरां। कस्य मे खलु निश्चयेन। जयोः रूपं दृष्टं स एव परो भवेत्। कथंभूतः शक्तः। न चान्यः पुमानित्यर्थः। कथंभूतयोस्तयोः। अन्यरूपाधिकतया योग्ययोः ॥३९॥

चो०टी०
॥१४॥

अद्यापितांनयनकज्जलंकथयंतिचेसध्याहार्यं। तस्याः नयनकज्जलं। तदेवकर्तृ। अन्योप्युत्तम
नायिकः। पुरुषांतरेण कथ्यस्याशयः॥ किंभूतं नयनकज्जलं उज्ज्वलास्यं उज्ज्वलदीपिवत्। आस्यंमुखंते
न तथा तत्कथं। चतुर्णां वर्णानां मध्ये। निःस्कालिमागुणेन कज्जलेन। तन्मुखस्योज्वल्यं। जनितं
मित्याह। यथोदयगिरौ ध्वंसान्निकृ सूर्यो दीपयते। इतिकज्जलस्योज्वलता। पुनः कथंभूतं। विश्रां
तकर्णयुगले। विश्रांतं स्थितं कर्णयोः समीपे येन तत्तथा। कुतः परिहासहेतोः। अन्योपियः

॥अद्यापितांनयनकज्जलमुज्ज्वलास्यं विश्रांतकर्णयुगलंपरिहासहेतोः॥ अत्युच्चस्तन
॥पृथुपीनपयोधराभ्यां स्त्रीणां वपुर्यदि विनश्यति कोत्र दोषः॥४०॥ अद्यापि निर्मलशार
॥दशशिगौरकांतं चेतो मुनेरपि हरेत्किमु मादृशानां॥ वक्त्रं सुधामयमहं यदि तत्प्रपद्ये चुंबामि बाम्म
विरतं व्यवतेन येन॥४१॥

परिहासनिर्दिशस्थाने कुरुते। स एव प्राप्तिविशेषकपुरुषः। उत एव तिष्ठ निरलंकारः। किं तत्परिहासरूपं। अ
न एवाह। हि यस्माद्धेतोः। नमस्येवा। किमत्र। काभ्यां। पीनपयोधराभ्यां। अत्युच्चमांसलस्तनयुगलाभ्यां
एतद्वपुः स्त्रीणां कदाचिद्विनश्यति तदा नो आनयोः दोषो न धर्तव्य इत्यर्थः॥४०॥ अद्याप्यहं तद्वक्त्रं प्रप
द्ये। प्राप्नोति। तदापि बाम्मि। किं कुर्वन्। चुंबन्। कथं। अविरतं। वारं येन हेतुना व्यवते। सुखं प्राप्यते। कथंभूतं।
वक्त्रं। सुधामयं। अमृतमित्यर्थः। पुनः कथंभूतं वक्त्रं। शरच्छशिगौरकांतं। निर्मलं प्रदीपवत्। कुतः मुने
रपि चेतो हरेत्। किंपुनः अस्माकं प्राकृतानामित्यर्थः॥४१॥

॥१९

28

अहोआश्चर्यंवातर्के।यद्यहंप्राप्नोति।किंतत्।सुरतैकतीर्थस्थं।तदात्यजामि।कान्।प्राणान्।जीवि
तान्।किंनिमित्तं।पुनराप्तिहेतोः।कथं।नियतं।निश्चितं।यथा।कोपिप्रयागादितीर्थे प्राणत्यागंकरो
त्येवं।अहमपिइहतत्प्राप्तिनिमित्तंस्वप्राणान्।त्यजामीतिअन्वयः॥किंभूते व क्व।सुरतैकतीर्थे।पुनःक
थंभूतंकमलरेणुसुगंधगंधी॥कमलरेणुतद्व।सुगंधेनगंधी।पुनःकिंविशिष्टं।तत्प्रेमवारि।तस्याः
प्रेमएववारि।यत्रतीर्थेतंतथा।पुनःकथंभूतं।मकरध्वजपातकारि॥कामदेवस्यपतनहेतुना॥४२॥अद्या

॥अद्याप्यहोकमलरेणुसुगंधगंधितत्प्रेमवारिमकरध्वजपातकारि॥प्राप्नोम्यहंयदितदासु
॥रतैकतीर्थेप्राणांस्त्यजामिनियतंपुनराप्तिहेतोः॥४२॥अद्यापितांजगतिसुंदरलक्षपूर्णां
॥अन्योन्यमुत्तमगुणाधिकसंप्रसन्नां॥अन्याभिरप्युपमितुंनमयाचशक्यंरूपंतदीयमितिमे
हृदयेवितर्कः॥४३॥

पीतिवितर्कः।अहः।क्व।हृदये।कस्य।मेमम।मइतिकिं।तदीयंरूपंनशक्यंनपार्यते॥किंकर्तुं।उपमितुं।उ
पकारंकर्तुं।केनमया।काभिः।अन्याभिः।अपीतिनिश्चितं।नायिकाभिः।सह।क्व।जगतिसंसारे।क
थंभूते।जगतिसुंदरलक्षपूर्णां।लावण्याधिकालक्षसंख्यागुणपूरिते।पुनःकथंभूतेजगति।उत्त
मगुणाधिकसंप्रसन्ने।अष्टोत्तरगुणाधिकसंप्रसन्नेप्राप्तेतिभावः।क्व।अन्योन्यंपरस्परं॥४३॥

चौ०टी०
॥१५॥

आसे। वर्त्तते। कासाराजपुत्रीइतियोजना। कथंभूतासा। मनस्तटिनी। कस्य। ममकस्य। सदासर्वदैव। ममम
नसः सदाअवगाहंत्री तेनदीवतू वर्त्ततेइति भावः। पुनः कथंभूतासा। रोमांचवीचिविलसद्विपुलस्वभा
वा। रोमांचवीचिरनङ्गजनितविभवं। गात्रकंपं। शरीरस्वेदं। कथंभूतं। अहन्यत्सुकेशररजःक्षतवी
क्षणं। आहन्यमानशोभमानकमलं। कमलकेशररजसा रेणुनाक्षतवीक्षणंलोचनंयस्यसेसर्थः।
पुनः कः। मां। प्रियराजहंसं। राजहंसमिवप्रीतं। अन्यापियाक्लिलैंदीभवति। तस्याः प्रीतोराजहंसः।

॥अद्यापिसाममम नस्तटिनीमदास्ते रोमांचवीचिविलसद्विपुलस्वभावा॥ हन्यात्सुके
२२ ॥शरैजः क्षतवीक्षणां मां गात्रकंमंकथयेति प्रियराजहंसी॥ ४४॥ अद्यापितां नृपतिशे ५
॥खरराजपुत्रीं संपूर्णयौवनमदालसघूर्णनेत्राम्॥ गंधर्वयक्षसुरकिंनरनागकन्यां स्व
॥र्गाद्दहो निपतितामिव चिंतयामि॥ ४५॥

इतिनिरलंकारः। एतस्मासस्मिन्नीजातिरुक्ता भवति॥ ४४॥ चिंतयामि। कां। तां। राजपुत्रीं। कं॥
अद्यापिइतियोजना। कथंभूतां तां। संपूर्णयौवनमदालसघूर्णनेत्रां। संपूर्णयौवनमदेनसंघूर्ण
मानेलोचनेयस्याः। सातां। कामिव। गंधर्वयक्षसुरकिंनरनागकन्यामिव। किंविष्टां निपतितां कस्मात् ग॥
स्वर्गात्। अहोइत्याश्चर्यं॥ ४५॥ ५५॥ ५५४ ॥१॥

30

हियस्मादर्थे। नविस्मरामिकांतांकनिशिद्दिवाइतियोजना। कथंभूतां। सुप्तोत्थितां। पुनः कथंभूतां निजवपुः
कृतवेदिमध्यां। वेदिपत्लग्नमध्यभागां। पुनः कथंभूतां। उत्तुंगसंभृतसुधास्तनकुंभयुग्मां। उच्चतरोमांस
लसुधारसपूरितस्तनकुंभयुगलां। पुनः कथंभूतां। नानाविचित्रकृतमंडनमंडितांगीं। अनेकरूपविचित्रम

॥अद्यापितांनिजवपुःकृतवेदिमध्यामुत्तुंगसंभृतसुधास्तनकुंभयुग्मां॥नानाविचित्रकृतमंडन
॥मंडितांगींसुप्तोत्थितांनिशिदिवानहिविस्मरामि॥४६॥ अद्यापितांकनककांतिमदालसांगीं
॥व्रीडोत्सुकांनिपतितामिवचेष्टमानां॥अंगांगसंगपरिचुंबनभग्नमोहांतांजीवनौषधिमिव
॥प्रमदांस्मरामि॥४७॥

डनैरलंकृतशरीरां॥४६॥ अद्यापितांस्मरामि। कां। प्रकृष्टमतिशयितमदंयस्याःसातामितियोजना।
कथंभूतांकनककांतिमदालसांगीं। सुवर्णसदृशकांति। मदेनअलसमंगंयस्याःसातां। तथोक्तां। पुनःकिं
भूतां। व्रीडोत्सुकां। लज्जयोत्कटितां। पुनःकिंभूतां। चेष्टमानां। कामिव। निपतितामिभूमौपतितुमिव
वर्त्तमाना। पुनःकथंभूतां। अंगांगसंगपरिचुंबनभग्नमोहां। अंगांगसंगेनालिंगनविशेषेण
चुंबनेनमयासहभग्नःमोहोयस्याःसातां। कामिवस्मरामि। जीवनौषधिमिवममजीवना
मऔषधिविशेषइत्यर्थः॥४७॥

चौ॰टी॰
॥१६॥

स्मरामि। किं तत्सुरतकेलिनिरस्तयुद्धं। कस्याः तस्याः अद्यापि इति योज्यं। सुरतक्रीडायां मया युद्ध कथंभूतं। बंधोपबंधपतनोत्थितशून्यहस्तं। बंधनं पक्कजासनादि उपबंधनेन तस्य भेदः। उभाभ्यां पतनोत्थिता मां च शून्यहस्तं यत्र युद्धे तत्तथा। पुनः कथंभूतं युद्धं। दंतोष्ठपीडः नखक्षतरक्तसिक्तं। दंतोष्ठाभ्यां निपीडनं नखक्षतेभ्यो जातं यद्रक्तं तेनासिक्तं आसिंचितं। पुनः कथंभूतं। रतिबंधुरनिष्ठुरत्वा। रतिः क्रीडा तया। बंधुरं निष्ठुरं काठिन्यं यत्रेति भावः॥४८॥ अन्यदाह। लुनीहि। कां दयां कथं त्वरितं शीघ्रेण। भ्रा

॥अद्यापि तत्सुरतकेलिनिरस्तयुद्धं बंधोपबंधपतनोत्थितशून्यहस्तं। दंतोष्ठपीडननख
॥क्षतरक्तसिक्तं तस्याः स्मरामि रतिबंधुरनिष्ठुरत्वं॥४८॥ अद्याप्यहं वरवधूसुभगा
॥भियोगं शक्नोमि नान्यविधिना च कथं विसोढुं॥ तद्भ्रातरं मरणमेव हि दुःखशांतेर्विज्ञापयामि
॥भवतस्त्वरितं लुनीहि॥४९॥

तरि विज्ञापयामि। इति योज्यं। सुप्रसादेन। दुःखशांतेः। मरणमेवाश्रयः। अद्यापि अहं शक्नोमि। किं कर्तुं सोढुं कम्। वरवधूसुरभाभियोगं। अन्याश्वेष्टनापि। काभिः। सद्यः। सुभगाभिः॥ निवेशयं साशक्तिके न अन्यापि विधिना। न च शब्दोत्र पादपूरणे॥४९॥ ५०॥ ५०॥ ५०॥

रा॰
॥१६

अद्यापिनोज्झति।ससजाति।कोहरः किंकालकूटं।उग्रविषमितियाजना।किलेतिप्रसिद्धं।तथैवबि

॥अद्यापिनोज्झतिहरः किलकालकूटं कूर्मोबिभर्त्तिधरणींखलुपृष्ठभागे॥अंभोनिधि॥
॥र्वहतिदुःसहवाडवाग्नीमंगीकृतंसुकृतिनः परिपालयंति॥५०॥

भर्त्ति।दृष्टांतिकः कूर्मः कूर्मरूपी श्रीकृष्णः कां धरणीं। केनपृष्ठेन।वाराहरूपेण।खलुनिश्च
येन।तथैवअंभोनिधिः समुद्रः दुःसहः।सहितुमशक्यः।वाडवाग्निः।वडवानलः।वह
त्तिसुकृतिनः पुण्यवंतः।अंगीकृतं।वस्त्विसंध्याहारः।परिपालयंति॥५०॥ इतिबिल्ह
णविरचिताचौरपंचाशिकासटीकासमाप्ता॥ ६५॥ ६८॥ ६२५ ६२५ ६५१

अतिशयकुरुवाणीसांप्रतंकाईबालेहसखिरमसिसाईंनैवकिंचिसुरवीभिः॥जवलगिपुरमोगेविरहणोमाईदीप्यतवलागि
हृदयंमेपंचबाणःक्षिणोति॥५१॥केचिद्वदंतिसुकवेरपिमुग्धभावोनाद्यापियातिरमलायनरेंद्रपुत्र्या॥भोभोकविप्रवि
जहीतिविमोहमाशुअद्यापितांहिपरिचिंतयसर्वसिद्ध्यै॥५२॥शृंगारसागरसमुज्वलचंद्रलेखाचित्तंकवेरपिविमोहयतीसुनेः

KKSU LIBRARY
RAMTEK
441 106
M-1397
Dist. Nagpur

चौ०प०६०

॥१७॥

ध्यायामि विद्वज्जनतां न चान्यमध्यापितामिति कविः पुनेरवदध्यौ ॥५३॥ भ्रंगारिभिः सुरगुणीभिर्नरराजलोको विज्ञापितः प्रमय
तां किमिदं चरित्रं ॥ काश्मीरकः कविरयां विविधा[illegible]गमज्ञो सोऽयं मिषाद्दूदति संभ्रमनस्तदेव ॥५४॥ सम्येस्त चौ[illegible]ति कथिते
सुकविः सुनेत्रां त्वां किं स्तुलाभिरमतेन नरराजपुत्रीं ॥ विक्षीयतां मनकेलिविनोददक्षं विज्ञाविज्ञाष्वरतिमापुरलं विलोक्य ॥५५॥
भूयिष्टदुःखजलधौ पतितोपि भूपः किंचित्तदागमजनं वदतीति किं सः ॥ तं चेष्टितं कथयत्किं स जनं प्रणम्य प्राह प्रभो
स्मरखिदेवसमाननेत्रां ॥५६॥ राजा विचार्य सुकविः सकलागमज्ञां पुत्रीं कवीन्द्ररमणीरमणैकनिष्ठां ॥ इषत्कलोत्रा
त गुणा निहिता स एवं पुत्री कवीश्वरमथोभवदद्भुतं सः ॥५७॥ तं भूपतिः कविवरं तु विमोचयित्वा दत्वा सुतामपि निवृत्रि
ष्ट गुणाय तस्मै ॥ विद्वत्सुतास्वव धपानव [illegible] ॥५८॥ इति हर्षमापतुरस्मौ
चौरपंचाशिका समाप्ता
नरराजपुत्र्यौ विद्वांस्तथा गुणवती च नरेंद्रपुत्री ॥ अन्योन्यसंगरीतरंगशुभौ सुभोगौ भ्रंगारदर्शितगुणौ जगति
प्रसिद्धौ ॥५९॥ मित्रं त्वशी सकलपुष्पसरोवसंतो यस्यास्ति बंधुरपि यस्य रतिः कलत्रं ॥ यस्यापि सुंदरवपुस्तनुर्वनिता कृ
शांगी पुष्पायुधः स कुशलं खलु पुष्प ॥६०॥ विद्वल्लोकसभासु काव्यकुशलै[illegible]रापाद्यमाना मुहु[illegible]र्नास्कृत्तायेत ववक्षि
तास कथके विश्वेन तन्येति चा ॥ सत्संकाव्यविचारचंचुरमतिः श्रीमान्नरासंसकः संपूर्णं समचीकरत्सुविदुषां भक्ते
न कामेंदुना ॥६१॥ इति श्री बिल्हणकविना कृतं बिल्हणकाव्यं संपूर्णमस्तु ॥ श्रीगजाननार्पणमस्तु ॥ ७ ॥ ७ ॥ ७ ॥

राम

॥१८

```
[OrderDescription]
,CREATED=21.10.20 12:12
,TRANSFERRED=2020/10/21 at 12:17:39
,PAGES=34
,TYPE=STD
,NAME=S0004290
,Book Name=M-1397-CHOURPACHSHIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
```

```
FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,
```